जिन्वति । जसति । गमति । प्रति । प्राति । प्रयति । वञ्चते । अयर्यति । जेहते । षःकति । सुम्पति । पत्साति । वाति । याति । द्रवति । द्राति । दूडति । एजति । जमति । जवति । वस्नुति । अनिति । पवते । हन्ति । सेधति । अगन् । अजगन् । जिगाति । पतति । इन्वति । दूमति । द्रवति । वेति । ह्वयन्तात् । एति । अगायात् । अयुयुरिति । द्वाविंशशतं गतिकर्माणः ।" एतेषां भ्वाद्यादिगणीयत्वं विकरणादेवावसेयम् ।

**गतितालिन्** पु० स्कन्दसैन्यभेदे "शृणु नामानि चान्येषां येऽन्ये स्कन्दस्य सैन्यकाः" इत्युपक्रमे "वैताली गतिताली च तथा कथकवाचिकौ" भा० शल्य० ४६अ० ।

**गतिला** स्त्री गम–इलच् मिथिला० नि तान्तादेशः । १वेत-लतायाम् उज्ज्वल० २नद्यां ३परम्परायाञ्च उणादिको० ।

**गतिसत्तम** पु० गतिर्बोधः, प्राप्यं स्थानं वा तासां सत्तमश्च । १परमेश्वरे । "आदित्यो ज्योतिरात्मा च सहिष्णुर्गतिसत्तमः" विष्णुस० ।

**गत्वन्** त्रि० गम–क्वनिप् मलोपे तुक् । गन्तरि । स्त्रियां ङीप् रश्चान्तादेशः । गत्वरी ।

**गत्वर** त्रि० गम–क्वरप् मलोपे तुक् । गमनशीले स्त्रियां ङीप् । "अभिमानधनस्य गत्वरैः" किरा० ।

**गत्वा** अव्य० गम–क्त्वा । गतिं कृत्वेत्यर्थे "सद्यः पुरीपरिसरे च शिरीषमृद्वी गत्वा जवात् त्रिचतुराणि पदानि सीता" उत्तरच० । वेदे तु "क्त्वायक् च" पा० यक् । गत्वाय तदर्थे अव्य० "दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत्" ऋ० ८,१००,८ । "गत्वाय गत्वा" भा० । स्नात्व्यादि० नि० आतःस्थाने ईत् । गत्वी तदर्थे अव्य० । "सा नोदुही यद्यवसेव गत्वी" ऋ० ४।४१।५ ।

**गद** मेघध्वनौ अद० चुरा० उभ० अक० सेट् । गदयति ते अजगदत् त । गदयां बभूव आस चकार चक्रे ।

**गद** व्यक्तभाषणे भ्वा० पर० सक० सेट् । गदति अगादीत्-अगदीत् जगाद । गदितं गदः । गद्यं निगाद्यम् । प्रणिगदति+प्रण्यगदत् । "जगादाग्रे गदाग्रजम्" माघः । "यस्य सायं सदा चैवं श्लोकमेकं जगाद ह" भा० व० ६७अ० । "अथ जगदुरनीचैराशिषस्तस्य विप्राः" भट्टिः । "शुद्धान्तरक्ष्या जगदे कुमारी" रघुः । "अन्तर्वाष्पभरोपरोधि गदितम्" शकु० । "विस्तरात् गदतो मम" देवीमा० ।

नि+नितरां कथने । "निगदामि यथा युक्तं पुराणाश्रयसंयुतम्" भा० आ० ५अ० । "पौरा निवर्त्तध्वमिति न्यगादीत्" भट्टिः । "मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र ! सदा निगद्यसे" रघुः । "न नैषधकार्य्यमिदं निगाद्यम्" नैष० । भावे वा अप् । निगादः निगदः । चतुर्थ्यन्ततयोच्चारणे च । "प्रतिनिगद्य होमः" कात्या०श्रौ०६,१०२६ । "देवतां प्रति निगद्य देवतापदं चतुर्थ्यन्तमुच्चार्य्य स्वाहाकारेण होमः" कर्कः ।

प्रति+प्रत्युत्तरकथने । "अभिगीयाभिरव्यग्रः प्रश्नं प्रतिजगाद ह" भा० आनु० २२४अ० ।

वि+विरुद्धोक्तौ । "न हि निम्बात् स्रवेत् क्षौद्रं लोके विगदितं वचः" रामा० अयो० ३५अ० ।

**गद** पु० गद–अच् । १रोगे अमरः । "व्रणोत्थानाञ्च विज्ञानं तद्वद्ग्रतिषेधनम् । प्रतिश्यायनिषेधश्च शिरोगदविवेचनम् । चिकित्सा तद्गदानाञ्च" सुश्रुतः । "येषां गदानां ये योगाः प्रवक्ष्यन्तेऽगदङ्कराः ।" सुश्रु० । "असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" माघः । गद–अव्यक्तध्वनौ भावे अच् । २मेघध्वनौ । शब्दक० भाषणार्थकतोक्तिश्चिन्त्या हलन्तत्वात् ततो भावे घञ एवानुशासनात् नावेवोपगदेऽप्योर्विधानात् । ३रोहिणीगर्भजाते वसुदेवपुत्रभेदे पु० । "बलं गदं सारणञ्च दुर्मदं विपुलम् ध्रुवम् । वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्" भाग० ९,२४अ० । "हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः । आसते कुशलं कच्चित्" भा० १।१२१४,२८ । चलितानकदुन्दुभिः पुरः सबलस्त्वं सह सारणेन तम् । समितौ रभसादुपागतः सगदः सम्प्रतिपत्तुमर्हसि" माघः "जगादाग्रे गदाग्रजम्" माघः । कु(ड़) ४कुष्ठे विषभेदे न० राजनि० । गदाख्य-गदाह्वयादयोऽप्यत्र ।५असुरभेदे पु० । गदाशब्दे दृश्यम् ।

**गद्गद** न० गद्गद+पृषो० । गद्गदभाषणे "वक्त्रजेषु कण्ठोष्ठतालुनामन्यतमे गद्गदवाक्यता" सुश्रु० । गद्गदेत्येव पाठः सम्यक् ।

**गदयित्नु** पु० गदि–इत्नुच् णेरयादेशः । १कामे, २कामुके ३वावदूके च त्रि०मेदि० ४शब्दे उज्ज्वलदत्तः ।

**गदा** स्त्री गद–अच् टाप् । १स्वनामख्याते लौहादिकीलिते, २लौहमये वाऽस्त्रभेदे, तद्युद्धक्रियाभेदो वह्नि पु० धनुर्वेदे दर्शितो यथा "आहतं विहृतं चैव गोमूत्रकमनावनम् । तयोर्द्धगावनमितं वामदक्षिणमेव